श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ चतुर्थः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्थः सर्गः ॥

## श्रीरामलक्ष्मणकर्तृको विराधस्य वधः

ह्रियमाणौ तु काकुत्स्थौ दृष्ट्वा सीता रघूत्तमौ।
उच्चैः स्वरेण चुक्रोश प्रगृह्य सुमहाभुजौ ॥ **3.4.1** ॥

एष दाशरथी रामः सत्यवाञ्छीलवाञ्शुचिः।
रक्षसा रौद्ररूपेण ह्रियते सहलक्ष्मणः ॥ **3.4.2** ॥

मामृक्षा भक्षयिष्यन्ति शार्दूलद्वीपिनस्तथा।
मां हरोत्सृज काकुत्स्थौ नमस्ते राक्षसोत्तम ॥ **3.4.3** ॥

तस्यास्तद् वचनं श्रुत्वा वैदेह्या रामलक्ष्मणौ।
वेगं प्रचक्रतुर्वीरौ वधे तस्य दुरात्मनः ॥ **3.4.4** ॥

तस्य रौद्रस्य सौमित्रिः सव्यं बाहुं बभञ्ज ह।
रामस्तु दक्षिणं बाहुं तरसा तस्य रक्षसः ॥ **3.4.5** ॥

स भग्नबाहुः संविग्नः पपाताशु विमूर्च्छितः।
धरण्यां मेघसङ्काशो वज्रभिन्न इवाचलः ॥ **3.4.6** ॥

मुष्टिभिर्बाहुभिः पद्भिः सूदयन्तौ तु राक्षसम्।
उद्यम्योद्यम्य चाप्येनं स्थण्डिले निष्पिपेषतुः ॥ **3.4.7** ॥

स विद्धो बहुभिर्बाणैः खड्गाभ्यां च परिक्षतः।
निष्पिष्टो बहुधा भूमौ न ममार स राक्षसः॥ **3.4.8** ॥

तं प्रेक्ष्य रामः सुभृशमवध्यमचलोपमम्।
भयेष्वभयदः श्रीमानिदं वचनमब्रवीत्॥ **3.4.9** ॥

तपसा पुरुषव्याघ्र राक्षसोऽयं न शक्यते।
शस्त्रेण युधि निर्जेतुं राक्षसं निखनावहे॥ **3.4.10** ॥

कुञ्जरस्येव रौद्रस्य राक्षसस्यास्य लक्ष्मण।
वनेऽस्मिन् सुमहच्छ्वभ्रं खन्यतां रौद्रवर्चसः॥ **3.4.11** ॥

इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति।
तस्थौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान्॥ **3.4.12** ॥

तच्छ्रुत्वा राघवेणोक्तं राक्षसः प्रश्रितं वचः।
इदं प्रोवाच काकुत्स्थं विराधः पुरुषर्षभम्॥ **3.4.13** ॥

हतोऽहं पुरुषव्याघ्र शक्रतुल्यबलेन वै।
मया तु पूर्वं त्वं मोहान्न ज्ञातः पुरुषर्षभ॥ **3.4.14** ॥

कौसल्या सुप्रजास्तात रामस्त्वं विदितो मया।
वैदेही च महाभागा लक्ष्मणश्च महायशाः॥ **3.4.15** ॥

अभिशापादहं घोरां प्रविष्टो राक्षसीं तनुम्।
तुम्बुरुर्नाम गन्धर्वः शप्तो वैश्रवणेन हि॥ **3.4.16** ॥

प्रसाद्यमानश्च मया सोऽब्रवीन्मां महायशाः।
यदा दाशरथी रामस्त्वां वधिष्यति संयुगे॥ **3.4.17** ॥

तदा प्रकृतिमापन्नो भवान् स्वर्गं गमिष्यति।
अनुपस्थीयमानो मां स क्रुद्धो व्याजहार ह॥ **3.4.18** ॥

इति वैश्रवणो राजा रम्भासक्तमुवाच ह।
तव प्रसादान्मुक्तोऽहमभिशापात् सुदारुणात्॥ **3.4.19** ॥

भुवनं स्वं गमिष्यामि स्वस्ति वोऽस्तु परन्तप।
इतो वसति धर्मात्मा शरभङ्गः प्रतापवान्॥ **3.4.20** ॥

अध्यर्धयोजने तात महर्षिः सूर्यसन्निभः।
तं क्षिप्रमभिगच्छ त्वं स ते श्रेयोऽभिधास्यति॥ **3.4.21** ॥

अवटे चापि मां राम निक्षिप्य कुशली व्रज।
रक्षसां गतसत्त्वानामेष धर्मः सनातनः॥ **3.4.22** ॥

अवटे ये निधीयन्ते तेषां लोकाः सनातनाः।
एवमुक्त्वा तु काकुत्स्थं विराधः शरपीडितः॥ **3.4.23** ॥

बभूव स्वर्गसम्प्राप्तो न्यस्तदेहो महाबलः।
तच्छ्रुत्वा राघवो वाक्यं लक्ष्मणं व्यादिदेश ह॥ **3.4.24** ॥

कुञ्जरस्येव रौद्रस्य राक्षसस्यास्य लक्ष्मण।
वनेऽस्मिन्सुमहाञ्श्वभ्रः खन्यतां रौद्रकर्मणः॥ **3.4.25** ॥

इत्युक्त्वा लक्ष्मणं रामः प्रदरः खन्यतामिति।
तस्थौ विराधमाक्रम्य कण्ठे पादेन वीर्यवान्॥ **3.4.26** ॥

ततः खनित्रमादाय लक्ष्मणः श्वभ्रमुत्तमम्।
अखनत् पार्श्वतस्तस्य विराधस्य महात्मनः॥ **3.4.27** ॥

तं मुक्तकण्ठमुत्क्षिप्य शङ्कुकर्णं महास्वनम्।
विराधं प्राक्षिपच्छ्वभ्रे नदन्तं भैरवस्वनम्॥ **3.4.28** ॥

तमाहवे दारुणमाशुविक्रमौ
स्थिरावुभौ संयति रामलक्ष्मणौ।

मुदान्वितौ चिक्षिपतुर्भयावहं
    नदन्तमुत्क्षिप्य बलेन राक्षसम् ॥ **3.4.29** ॥

अवध्यतां प्रेक्ष्य महासुरस्य तौ
    शितेन शस्त्रेण तदा नरर्षभौ।
समर्थ्य चात्यर्थविशारदावुभौ
    बिले विराधस्य वधं प्रचक्रतुः ॥ **3.4.30** ॥

स्वयं विराधेन हि मृत्युमात्मनः
    प्रसह्य रामेण यथार्थमीप्सितः।
निवेदितः काननचारिणा स्वयं
    न मे वधः शस्त्रकृतो भवेदिति ॥ **3.4.31** ॥

तदेव रामेण निशम्य भाषितं
    कृता मतिस्तस्य बिलप्रवेशने।
बिलं च तेनातिबलेन रक्षसा
    प्रवेश्यमानेन वनं विनादितम् ॥ **3.4.32** ॥

प्रहृष्टरूपाविव रामलक्ष्मणौ
    विराधमुर्व्यां प्रदरे निपात्य तम्।
ननन्दतुर्वीतभयौ महावने
    शिलाभिरन्तर्दधतुश्च राक्षसम् ॥ **3.4.33** ॥

ततस्तु तौ काञ्चनचित्रकार्मुकौ
    निहत्य रक्षः परिगृह्य मैथिलीम्।
विजह्रतुस्तौ मुदितौ महावने
    दिवि स्थितौ चन्द्रदिवाकराविव ॥ **3.4.34** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे चतुर्थः सर्गः ॥